# Raivatamanukritam Narayana Stotram

# રૈવતમનુકૃતં નારાયણસ્તોત્રમ્

## Document Information

Text title : Raivatamanukritam Narayana Stotram

File name : raivatamanukRRitaMnArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 55/1-13||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 25, 2025

*sanskritdocuments.org*

# રૈવતમનુકૃતં નારાયણસ્તોત્રમ્

શ્રીનારાયણ ઉવાચ ।
શ઼ૃણુ લક્ષ્મિ ! રૈવતાખ્યો મનુર્વૈકુણ્ઠમાપ્તવાન્ ।
તુષ્ટાવ ચ મહાપ્રેમણા દયાલું માં ત્વયાઽન્વિતમ્ ॥ ૧॥

નમઃ સચ્ચિત્સ્વરૂપાયાનન્દસન્દોહવાર્ધયે ।
નમોઽસ્ત્વેકસ્વરૂપાયોભયરૂપાય તે નમઃ ॥ ૨॥

નમો હિરણ્યકેશાય શ્મશ્ર્વશ્મશ્રુમતે નમઃ ।
નમઃ સ્તન્યાઽસ્તન્યવતે બીજાઽબીજધૃતે નમઃ ॥ ૩॥

નમો બહિઃ પ્રચિહ્નાયાબહિશ્ચિહ્નાય તે નમઃ ।
નમો વિશ્વક્પ્રવાલાય ક્વચિદ્વાલાય તે નમઃ ॥ ૪॥

નમો દક્ષિણસત્ત્વાય ।
વામસત્ત્વાય તે નમઃ ।
નમ ઊર્ધ્વસ્વરૂપાયાનૂર્ધ્વરૂપાય તે નમઃ ॥ ૫॥

નમ આધેયરૂપાયાધારરૂપાય તે નમઃ ।
નમો દ્વિદલરૂપાયાઙ્કુરપ્રસૂતયે નમઃ ॥ ૬॥

નમો વૈકુણ્ઠવાસાય કુણ્ઠવાસાય તે નમઃ ।
નમો માનસરૂપાય ભક્તરૂપાય તે નમઃ ॥ ૭॥

નમસ્તે કરુણાસિન્ધો નમઃ સૌરાષ્ટ્રવર્ધિને ।
નમો રૈવતવાસાય દામોદરાય તે નમઃ ॥ ૮॥

નમઃ પત્નીવ્રતાખ્યાય નમઃ કૃષ્ણાય વિષ્ણવે ।
નમોઽનન્તસ્વરૂપાય મમાન્તર્યામિણે નમઃ ॥ ૯॥

સ્વતન્ત્રસ્ત્વં મહાવિષ્ણો ન જાને ત્વં કિમિચ્છસિ ।
ભક્તો યદર્થમાહૂતસ્તદ્વૈ વિધાતુમર્હસિ ॥ ૧૦॥

દાસોઽયં કૃપયા વિષ્ણો નેયઃ પારં ભવાધ્વનઃ ।
યત્ર તે ચરણૌ સ્તસ્તદ્દેશો મે હ્યરણં ભવેત્ ॥ ૧૧॥

ન વૈ ત્યાજ્યઃ કૃપાનાથ દાસોઽયં શરણાગતઃ ।
કરુણયા ગૃહીતોઽયં ન વૈ તં ત્યક્તુમર્હસિ ॥ ૧૨॥

યદિષ્ટં ક્ષેમકૃલ્લોકે તદિષ્ટં સંવિધીયતામ્ ।
ઇતિ સ્તુત્વા વિરરામ રૈવતો ભક્તસત્તમઃ ॥ ૧૩॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૫૫-અધ્યાયાન્તર્ગતં
રૈવતમનુકૃતં નારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૫૫/૧-૧૩॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 55/1-13..

Proofread by PSA Easwaran

---

*Raivatamanukritam Narayana Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*